# Kardamarishikritam Vishnu Stotram

# કર્દમઋષિકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Kardamarishikritam Vishnu Stotram

File name : kardamaRRiShikRRitaMviShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 3/21/13-21||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# કર્દમઋષિકૃતં વિષ્ણુસ્તોત્રમ્

ઋષિરુવાચ ।
જુષ્ટં બતાદ્યાખિલસત્ત્વરાશેઃ
સાંસિદ્ધ્યમક્ષ્ણોસ્તવ દર્શનાન્નઃ ।
યદ્દર્શનં જન્મભિરીડ્ય સદ્ભિ-
રાશાસતે યોગિનો રૂઢયોગાઃ ॥ ૧૩॥

યે માયયા તે હતમેધસસ્ત્વ-
ત્પાદારવિન્દં ભવસિન્ધુપોતમ્ ।
ઉપાસતે કામલવાય તેષાં
રાસીશ કામાન્નિરયેઽપિ યે સ્યુઃ ॥ ૧૪॥

તથા સ ચાહં પરિવોઢુકામઃ
સમાનશીલાં ગૃહમેધધેનુમ્ ।
ઉપેયિવાન્ મૂલમશેષમૂલં
દુરાશયઃ કામદુઘાઙ્ઘ્રિપસ્ય ॥ ૧૫॥

પ્રજાપતેસ્તે વચસાધીશ તન્ત્યા
લોકઃ કિલાયં કામહતોઽનુબદ્ધઃ ।
અહં ચ લોકાનુગતો વહામિ
બલિં ચ શુક્લાનિમિષાય તુભ્યમ્ ॥ ૧૬॥

લોકાંશ્ચ લોકાનુગતાન્ પશૂંશ્ચ
હિત્વા શ્રિતાસ્તે ચરણાતપત્રમ્ ।
પરસ્પરં ત્વદ્ગુણવાદસીધુ-
પીયૂષનિર્યાપિતદેહધર્માઃ ॥ ૧૭॥

ન તેઽજરાક્ષભ્રમિરાયુરેષાં
ત્રયોદશારં ત્રિશતં ષષ્ટિપર્વ ।
ષણ્નેમ્યનન્તચ્છદિ યત્ત્રિણાભિ-

કરાલસ્રોતો જગદાચ્છિદ્ય ધાવત્ ॥ ૧૮॥

એકઃ સ્વયં સન્ જગતઃ સિસૃક્ષયા
દ્વિતીયયાઽઽત્મન્નધિયોગમાયયા ।
સૃજસ્યદઃ પાસિ પુનર્ગ્રસિષ્યસે
યથોર્ણનાભિર્ભગવન્ સ્વશક્તિભિઃ ॥ ૧૯॥

નૈતદ્બતાધીશ પદં તવેપ્સિતં
યન્માયયા નસ્તનુષે ભૂતસૂક્ષ્મમ્ ।
અનુગ્રહાયાસ્ત્વપિ યર્હિ માયયા
લસત્તુલસ્યા તનુવા વિલક્ષિતઃ ॥ ૨૦॥

તં ત્વાનુભૂત્યોપરતક્રિયાર્થં
સ્વમાયયા વર્તિતલોકતન્ત્રમ્ ।
નમામ્યભીક્ષ્ણં નમનીયપાદ-
સરોજમલ્પીયસિ કામવર્ષમ્ ॥ ૨૧॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે તૃતીયસ્કન્ધે એકવિંશાધ્યાયાન્તર્ગતં
કર્દમર્ષિકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૩/૨૧/૧૩-૨૧॥

bhAgavatapurANa . adhyAya 3/21/13-21..

Proofread by PSA Easwaran

*Kardamarishikritam Vishnu Stotram*

pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*